# शब्दविमर्शः ।

(Dr.V.R.MANOJ, I. I. T. KANPUR)

## 3. श्रद्धालुः ।

अयमन्यः आलुजन्तः शब्दः **श्रद्धालु**रिति। तथा च भागवते तृतीयस्कन्धे विदुराय भागवतकथाम् उपक्रममाणो मैत्रेयः _

"सोऽहं तवैतत्कथयामि वत्स **श्रद्धाल**वे नित्यमनुव्रताय।।" इति (भागवतपुराणम् ३.८.९)।

पुलस्त्यप्रचोदितेन दयालुना पराशरेण मह्यं प्रोक्तां पुराणकथां त्वां कथयामीति भावः। 'श्रत्+डुधाञ् धारणपोषणयोः' (जुहो.1092) इत्यस्य धातोरिदं रूपम्। "आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु" *(पा.सू. ३.२.१३४)* इति सूत्रेण उत्सर्गतः तृन् विहितः। तस्यायमपवादः आलुच्प्रत्ययः।

तथा भट्टिकाव्ये यत्र 'रामो लक्ष्मणं चोदयति बालिप्राप्तं मार्गं तवापि भविष्यतीति वदे'ति। तस्मिन् प्रसङ्गे _

"स्पृहयालुं कपिं स्त्रीभ्यो निद्रालुमदयालुवत्।

**श्रद्धालुं** भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम्।। इति (भट्टिकाव्यम् ७.२१)।

स्त्रीभ्यः = नारीभ्यः , स्पृहयालुं = साधु स्पृहयन्तं, निद्रालुं = निद्राशीलं, अस्मत्कार्येऽनवधानाच्छयनीय एव सर्वदा स्त्रीभिः स्थितत्वादिति भावः। भ्रामरं = मधु, श्रद्धालुं = साधु अभिलषन्तं, अत एव धारुं = साधु पिबन्तं, मध्विति शेषः। अद्रौ = पर्वते, किष्किन्धायामित्यर्थः। सद्रुं = साधु सीदन्तं, कपिं सुग्रीवं, *(त्वं)*

अदयालुवत् = अदयनशील इव, वद = ब्रूहि इति भावः। नास्ति दया शीलमस्येत्यदयालुस्तद्वददयालुवदित्यर्थः।

तथा च "श्रद्धालुः श्रद्धया युक्ते" , "श्रद्धालुर्दोहदवती" इति चामरः। "श्रद्धालुर्दोहदिन्यां स्त्री श्रद्धायुक्ते च वाच्यवत्" इति मेदिनी च।

।।**श्रद्धालुः**।।

*******

## <u>4</u>.<u>निद्रालुः।</u>

"स्वप्नक् शयालुर्निद्रालुः" इत्यमरः। निद्राशील इत्यर्थः। 'नि+द्रा कुत्सायां गतौ' (अदा.1054) इत्यस्माद्धातोः 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)*

तथा च पञ्चतन्त्रे _ "काशीविवर्ज्जयेच्चौर्यं निद्रालुश्चर्मचौरिकाम्।

जिह्वालौल्यञ्च रोगाढ्यो जीवितं योऽत्र वाञ्छति।।" इति *(५.४१)* । एवमेव "अङ्गानि निद्रालुसविभ्रमाणि" इति ऋतुसंहारेऽपि पदमिदं प्रयुक्तं दृश्यते। महाकवेः भट्टेरगोचरं न खलु केऽपि शब्दप्रयोगः। यथा_

रामो लक्ष्मणं चोदयति बालिप्राप्तं मार्गं तवापि भविष्यतीति वदेति

"स्पृहयालुं कपिं स्त्रीभ्यो **<u>निद्रालु</u>**मदयालुवत्।

श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम्।। इति (भट्टिकाव्यम् ७.२१)।

स्त्रीभ्यः = नारीभ्यः , स्पृहयालुं = साधु स्पृहयन्तं, निद्रालुं = निद्राशीलं, अस्मत्कार्येऽनवधानाच्छयनीय एव सर्वदा स्त्रीभिः स्थितत्वादिति भावः। भ्रामरं =

मधु, श्रद्धालुं = साधु अभिलषन्तं, अत एव धारुं = साधु पिबन्तं, मध्विति शेषः। अद्रौ = पर्वते, किष्किन्धायामित्यर्थः। सदुं = साधु सीदन्तं, कपिं सुग्रीवं, (त्वं) अदयालुवत् = अदयनशील इव, वद = ब्रूहि।

।।**निद्रालुः**।।

*******

## **5. तन्द्रालुः।**

"अपि जाग्रत् स्वपन् जन्तुस्**तन्द्रालु**श्च प्रलापवान्।" इति सुश्रुतसंहितायाम् (उत्तरतन्त्रे ३९ अध्याये)। "ईषन्निद्रायुक्ते आलस्य युक्ते च **तन्द्रालुः**" इति जटाधरः। 'तत्+द्रा कुत्सायां गतौ' (**अदा.1054**) इत्यस्माद्धातोः 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (पा.सू. *३.२.१५८*)।

।।**तन्द्रालुः**।।

*******

## **6. उष्णालुः।**

अत्र 'ऊष रुजायाम्' (**भ्वा.683**) इति धातुः। यद्यपि आलुच्प्रत्ययविधायके, 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (पा.सू. *३.२.१५८*) इति सूत्रे अस्य धातोः ग्रहणं न कृतं तथापि वार्तिककारेण तस्यापि परिगणनं कृतम्, "शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः" *(५.२.१२२)* इति। तथा च _

"**उष्णालुः** शिशिरे निषीदति तरोर्मूलालवाले शिखी" इति (विक्रमोर्वशीयम् २.२३)।

।।**उष्णालुः**।।

*******

## **7. गृहयालुः।**

"**गृहयालु**र्ग्रहीतरि" इत्यमरः। ग्रहणशील इत्यर्थः। 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)* इति सूत्रेण 'गृहू ग्रहणे' (भ्वा.650) इत्यस्मादालुच्प्रत्यये रूपम्।

**।।गृहयालुः।।**

*******

## **8. पतयालुः।**

तथा च "पतयालुस्तु पातुके" इत्यमरः। पतनशील इत्यर्थः। 'पत्लृ गतौ' (भ्वा. **845**) इति धातोः 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)* इति सूत्रेण आलुच्प्रत्यये रूपम्।

**।।पतयालुः।।**

*******

## **9. शीतालुः।**

यद्यपि आलुच्प्रत्ययविधायके , 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)* इति सूत्रे अस्य धातोः ग्रहणं न कृतं तथापि वार्तिककारेण तस्यापि परिगणनं कृतम् , "शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः" *(पा.सूत्रवार्तिकम्.५.२.१२२)* इति।

तथा च "**शीतालुः** शीतबाधा युक्ते" इति जटाधरः।

।।**शीतालुः**।।

*******

## **10. शयालुः।**

अत्र 'श्यैङ् गतौ' (अदा.**963**) इति धातुः। यद्यपि आलुच्प्रत्ययविधायके, 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)* इति सूत्रे अस्य धातोः ग्रहणं न कृतं तथापि भाष्यकारेण तस्यापि परिगणनं कृतम्, "आलुचि शीङो ग्रहणं कर्तव्यम्" *(म.भा. ३.२.१५८)* इति। तथा च 'श्यैङ् स्वप्ने' (भ्वा.**963**) इत्यस्माद्धातोः प्रकृतवार्तिकानुस्वारेण आलुच्प्रत्ययः। "स्वप्नक् **शयालुः** निद्रालुः" इत्यमरः। "**शयालुः** स्यादजगरे निद्राशीले च कुक्कुरे" इति विश्वमेदिन्यौ।

।।**शयालुः**।।

*******

## **11. तृप्रालुः।**

यद्यपि आलुच्प्रत्ययविधायके, 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' *(पा.सू. ३.२.१५८)* इति सूत्रे अस्य धातोः ग्रहणं न कृतं तथापि वार्तिककारेण तस्यापि परिगणनं कृतम्, "शीतोष्णतृप्रेभ्यस्तन्न सहत इत्यालुज्वक्तव्यः" *(५.२.१२२)* इति। तथा च "तृप्रं दुःखम्" इति माधवः। धातुस्तु मृग्यः।

।।**तृप्रालुः**।।

*******

## **12. तृष्णालुः।**

'ञितृषा पिपासायाम्' (दिवा.१२२९) इत्यस्मात् प्राग्वदालुच्प्रत्ययः। पिपासार्दित इत्यर्थः।

# ।।तृष्णालुः।।

*******

अयमत्र आलुच्प्रत्ययप्रकृतिकानां धातूनां तत्तद्रूपाणाञ्च सङ्ग्रहः। एवं विधानामन्येषामपि शब्दानां यदि कदाचित् प्रयोगो दृश्येत, तेऽप्यत्र योजनीयाः।

| क्र.सं. | धातुः | गणसंख्या | रूपम् | अर्थः |
|---|---|---|---|---|
| 1. | ‘स्पृह ईप्सायाम्’ | (चुरा.1872) | स्पृहयालुः। | Disposed to be desirous or envious of, longing or eager for, covetous (with dative case) |
| 2. | ‘गृहू ग्रहणे’ | (भ्वा.650) | गृहयालुः। | Disposed to catch hold of or seize |
| 3. | ‘पत्लृ गतौ’ | (भ्वा. 845) | पतयालुः। | Tending or prone to fall, liable to fall |
| 4. | ‘दय दानगतिरक्षणेषु’ | (भ्वा.481) | दयालुः। | Kind, tender, merciful, compassionate |
| 5. | ‘नि+द्रा कुत्सायां गतौ’ | (अदा.1054) | निद्रालुः। | Sleeping, sleepy. An epithet of Vishnu |
| 6. | ‘तत्+द्रा कुत्सायां गतौ’ | (अदा.1054) | तन्द्रालुः। | Tired, exhausted, sleepy, slothful |
| 7. | ‘श्रत्+डुधाञ् धारणपोषणयोः’ | (जुहो.1092) | श्रद्धालुः। | Believing, full of faith, desirous, longing or wishing for (anything), a pregnant woman longing for anything |
| 8. | ‘श्यैङ् गतौ’ | (अदा.963) | शीतालुः। | Suffering from or shivering with cold, chilled, pinched |
| 9. | ‘ऊष रुजायाम्’ | (भ्वा.683) | उष्णालुः। | Not being able to bear heat, scorched by, suffering from heat |
| 10. | ‘श्यैङ् स्वप्ने’ | (भ्वा.963) | शयालुः। | Sleepy, slothful, a kind of snake, the boa-constrictor, a dog, a jackal |
| 11. | | | तृप्रालुः। | Worried |
| 12. | ‘ञितृषा पिपासायाम्’ | (दिवा.1229) | तृष्णालुः। | A very thirsty |